YE7ZD8N

# सङ्कलनात्मकं मूल्याङ्कनम् - II (2016-17)

## संस्कृतम् - सम्प्रेषणात्मकम्

## कक्षा - नवमी

**समय : होरात्रयम्** **पूर्णाङ्काः 90**

**निर्देशाः**

(i) प्रश्नपत्रे **चत्वारः खण्डाः** सन्ति।

खण्डः (क) अपठित-अवबोधनम् - **10 अङ्काः**

खण्डः (ख) रचनात्मक-कार्यम् - **15 अङ्काः**

खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - **30 अङ्काः**

खण्डः (घ) पठित-अवबोधनम् - **35 अङ्काः**

(ii) सर्वे प्रश्नाः **अनिवार्याः।**

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्ड : 'क' अपठित-अवबोधनम् - ( 10 अङ्काः )

1 **अधोलिखितम् गद्यांशम् पठित्वा प्रश्नानाम् उत्तराणि लिखत।(2+2+4+2)** 10

'विजयदशमी' हिन्दूनां प्रमुखोत्सवः अस्ति। अयं उत्सवः पापस्य उपरि पुण्यस्य प्रतीकम् अस्ति। एषः प्रतिवर्षम् आश्विनमासस्य शुक्लपक्षे दशम्या तिथौ सम्पन्नः भवति। इदं पर्व दीपावलीपर्वणः विंशतिदिनेभ्यः पूर्वम् आगच्छति। यदा श्रीरामः पितुः आज्ञां पालयितुं चतुर्दशवर्षाणि पर्यन्तं वने अवसत् तदा दानवराजः रावणः सीताम् अहरत्। स्वभार्याम् प्राप्तुं श्रीरामः रावणम् अमारयत्। यस्मिन् दिने रामः रावणम् अमारयत् तत् दिनम् एव "विजयदशमी" इति नाम्नाप्रसिद्धमभवत् ।विजयदशम्यांसवत्र आमोदः, प्रमोदः भवति। सर्वत्र मेलकं भवति। प्रतिनगरं रावणकुम्भकर्णादीनां विशालाः प्रतिमाः निर्मीयन्ते। अनेन महोत्सवेन सूच्यतेयत् 'रामादिवत् वर्तितव्यं न रावणादिवत्' इति। एतेन इदमपि वयं जानीमः यत् 'सत्यमेव जयते नानृतम्', 'पापं च सदा पराजयते' इति। अतः अस्माकं सर्वेषां भारतीयानां कर्त्तव्यं यद् उत्सवमिमं सोत्साहं मानयेम।

**I. एकपदेन उत्तरत।**

(i) किं सदा पराजयते?

(ii) अयम् उत्सवः कस्य प्रतीकः अस्ति?

**II. पूर्णवाक्येन उत्तरत।**

(i) विजयदशमी महोत्सवः कदा सम्पन्नःभवति?

(ii) सर्वेषां भारतीयानां किम् कर्त्तव्यम्?

**III. निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।**

(i) 'दानवराजः रावणः सीताम् अहरत्' इत्यत्र विशेषणपदं किम्?

(अ) सीताम् (ब) अहरत्

| | | | |
|---|---|---|---|
| | | (स) दानवराज: (द) रावण:<br>(ii) 'पर्व' अस्य किं पर्यायवाचिपदं गद्यांशे प्रयुक्तम्?<br>(अ) प्रतीक: (ब) उत्सव:<br>(स) मानयेम (द) मेलकं<br>(iii) 'जयते' अस्य विलोमपदं गद्यांशात् चित्वा लिखत –<br>(अ) अहरत् (ब) पराजयते<br>(स) सत्यमेव (द) अहरत्<br>(iv) 'अवसत् ' इति क्रियापदस्य कर्ता क:?<br>(अ) इदं (ब) एष:<br>(स) श्रीराम: (द) पितु:<br>**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** | |
| | | **खण्ड: 'ख' रचनात्मक-कार्यम् - ( 15 अङ्का: )** | |
| 2 | | भवत्या: नाम रेणु: अस्ति। स्वमित्रं होलिकावकाशे आगन्तुं निमन्त्रणपत्रं लिखत।<br>गुजरात-(i) ..............<br>तिथि: ..............<br>प्रिय सखि (ii) ..............<br>सस्नेहं स्मरणम्<br>सम्प्राप्तं भवत्या: स्नेहसिक्तं पत्रम्। परिज्ञाय अहम् अतीव (iii) .............. अस्मि। प्रिय सखि! अस्मिन् वर्षे (iv) .............. मार्चमासस्य विंशत्यां तिथौ भविष्यति। (v) .............. अस्माकं राष्ट्रिय: उत्सव: भवति। अस्मिन् महोत्सवे (vi) ..............अनेके सम्बन्धिन: आगच्छन्ति। मे अग्रज: भ्राता अपि अवकाशे राजकोट-नगरम् (vii) .............. । अत: अस्मिन्नवसरे आगन्तुं मम निमन्त्रणम् अस्ति। भवती (viii) .............. आगच्छतु। भवदागमनेन होलिकात्सवे (ix) ....... आनन्द:, उल्लास: च सम्पत्स्यते। पत्रोतरं शीघ्रमेव देयम्।<br>भवत्प्रतीक्षायाम्<br>(x) ..............<br>**मञ्जूषा :** अपूर्व:, होलिकोत्सव:, विभे, प्रदेशात्, प्रसन्ना, अवश्यमेव, अस्माकं, अयम्, आगमिष्यति, रेणु:। | 5 |
| 3 | | अधोदत्तं चित्रं दृष्ट्वा संस्कृतेन पञ्च वाक्यानि लिखत। (2x5=10) | 10 |

| | | | |
|---|---|---|---|
| | | <br>**मञ्जूषा**<br>श्रीरामः, गच्छति, वनस्य, सीता, लक्ष्मणः, अपि, तूणीरम्, पादुका, चरणयोः रामायणम्, वृक्षाः, मार्गे। | |
| | | **अथवा** | |
| | | **'साक्षरता–अभियानम्'** इति विषयम् अधिकृत्य संस्कृतेन पञ्च वाक्यानि लिखत।(2x5=10)<br>**मञ्जूषा**–देशस्य, समर्थः, नागरिकाः, बालकाः, उन्नतिः, सर्वेभ्यः, शिक्षा, अज्ञानम्, अशिक्षितः, मूलभूतः अधिकारः, पाठ्यसामग्री, सर्वकारः, अस्ति, शिक्षकाः। | 10 |
| | | **खण्डः 'ग' अनुप्रयुक्त व्याकरणम् – ( 30 अङ्काः )** | |
| | 4 | **उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत।**<br>(i) मार्गे ...................... भिक्षुकाय अहं भोजनं अयच्छम्।<br>(अ) गच्छन्तम् (ब) गच्छता (स) गच्छतः (द) गच्छते<br>(ii) गुरुवर! अहम् ...................... नमामि।<br>(अ) भवान् (ब) भवतै (स) भवन्तम् (द) भवता<br>(iii) नृपः भोजः ...................... सुपूजितः आसीत् ।<br>(अ) विदुषां (ब) विद्वद्भिः (स) विद्वांसः (द) विद्वत्सु<br>(iv) ऋषिः आशीर्वादम् यच्छति ...................... त्वं सुखी भव।<br>(अ) राजा (ब) राजनि (स) हे राजन् ! (द) राज्ञः<br>(v) स्व- ...................... उद्धारः एव तपः कथ्यते।<br>(अ) आत्मनः (ब) आत्मा (स) आत्मनि (द) आत्मनम्<br>(vi) अध्यापकः पृच्छति, छात्राः! ...................... पाठस्य पुनरावृत्तिः कृता न वा ?<br>(अ) भवता (ब) भवद्भ्यः (स) भवताम् (द) भवद्भिः | 6 |
| | 5 | **उचितसंख्यापदैः रिक्त स्थानानि पूरयत।**<br>(i) ................... नगरात् एकः शिक्षकः आगतः। (एक)<br>(ii) मुखे ................... नयने स्तः। (द्वि)<br>(iii) कालिदासस्य ................... नाटकेषु 'अभिज्ञान-शाकुन्तलम्' विश्वप्रसिद्धम् अस्ति। (त्रि) | 6 |

| | | | |
|---|---|---|---|
| | | (iv) उद्याने .................. बालकाः क्रीडन्ति। (चतुर्)<br>(v) .................. बालकाः संस्कृतं पठन्ति। (पञ्चन्)<br>(vi) कक्षायाम् .................. बालिकाः अनुपस्थिताः। (चतुर्) | |
| | 6 | **प्रदत्तविकल्पेभ्यः उचितधातुरूपाणि चित्वा रिक्तस्थानानि पूरयत।**<br>(i) त्वम् सदैव परिश्रमं ................ ।<br>(अ) कुर्याताम् (ब) कुर्याः<br>(स) कुर्यात् (द) कुर्युः<br>(ii) सर्वे जनाः कठिनसमयेऽपि ................ ।<br>(अ) मोदेरन् (ब) मोदेत<br>(स) मोदेमहि (द) मोदेथाः<br>(iii) बालकाः शिक्षकम् अवश्यम् ................ ।<br>(अ) पृच्छ (ब) पृच्छतु<br>(स) पृच्छताम् (द) पृच्छन्तु<br>(iv) माता स्वादिष्ठं भोजनं ................ ।<br>(अ) पचताम् (ब) पच<br>(स) पचतु (द) पचन्तु<br>(v) पिता बालकाय न ................ ।<br>(अ) क्रुध्येयाताम् (ब) क्रुध्येत्<br>(स) क्रुध्येत (द) क्रुध्येः<br>(vi) त्वं परिश्रमं कुरु, भिक्षां मा ................ ।<br>(अ) याचताम् (ब) याचेत<br>(स) याचस्व (द) याचै | 6 |
| | 7 | **प्रदत्तविकल्पेभ्यः उचित–उपपदविभक्तियुक्तं पदं चित्वा रिक्तस्थानेषु लिखत।**<br>(i) दुष्टेषु .................... न विश्वसेत्।<br>(अ) यानानाम् (ब) यानेषु<br>(स) यानेभ्यः (द) यानैः<br>(ii) .................... वामतः पुत्रः तिष्ठति।<br>(अ) जनकम् (ब) जनकेन<br>(स) जनकस्य (द) जनके<br>(iii) .................... अनन्तरं परीक्षाफलम् आगमिष्यति।<br>(अ) मासेन (ब) मासम्<br>(स) मासात् (द) मासे<br>(iv) .................... निकषा उटजः वर्तते।<br>(अ) नदी (ब) नद्या | 6 |

(स) नद्याः (द) नदीम्

(v) एतद् भोजनम् .................... अलम्।

(अ) अस्य (ब) अस्यै

(स) अस्मात् (द) अनेन

(vi) .................... अलम्।

(अ) अतिखादनम् (ब) अतिखादम्

(स) अतिखादनेन (द) अतिखादनाय

8 **अधोलिखितवाक्येषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।** 6

(i) धावन् बालकः पतति।

(अ) धाव् + शतृ (ब) धाव् + शानच्

(स) धाव् + क्त (द) धाव् + क्तवतु

(ii) लेखकाः मिलित्वा पुस्तकं __________ । (लिख् + क्तवतु)

(अ) लिखितः (ब) लिखितम्

(स) लिखितवान् (द) लिखितवन्तः

(iii) अभिज्ञानशाकुन्तलम् कालिदासेन __________ । (रच् + क्त)

(अ) रचितः (ब) रचितम्

(स) रचितेन (द) रचिताः

(iv) अध्यापिका छात्रान् प्रश्नान् पृष्टवती।

(अ) प्रच्छ् + क्तवतु (ब) प्रच्छ् + क्त

(स) प्रच्छ् + शतृ (द) प्रच्छ् + शानच्

(v) __________ वानराः फलानि खादन्ति। (कूर्द् + शतृ)

(अ) कूर्द्यमानः (ब) कूर्द्यमानाः

(स) कूर्दन् (द) कूर्दन्तः

(vi) मम सखी काशीतः आगता।

(अ) आ + गम् + क्त (ब) आ + गम् + शतृ

(स) आ + गम् + क्तवतु (द) आ + गम् + शानच्

## खण्ड : 'घ' पठित-अवबोधनम् - 35 अङ्काः

9 **अधोलिखितं गद्यांशं पठित्वा प्रदत्त-प्रश्नानां उत्तराणि लिखत-(2+1+2)** 5

एकदा असौ मुनिः क्वापि नगरे एकं ब्राह्मणगृहम् एत्य तद्गृहिणीं भिक्षामयाचत। सा पतिव्रता गृहिणी तमवदत्- "प्रतीक्षस्व क्षणं, यावद् भर्तुः परिचर्यं समापये" इति। एतत् श्रुत्वा स मुनिः तां कोपदृष्ट्या दृष्टवान्। सा विहस्य अभाषत-"मुने! न अहं बलाकेति"। तत् आकर्ण्य विस्मितः मुनिः "एतत् कथमिव ज्ञातमनया" इति चिन्तयन् तत्र उपाविशत्।

I. एकपदेन उत्तरत।

(i) मुनिः काम् भिक्षाम् अयाचत?

(ii) मुनिः गृहिणीं कथं दृष्टवान्?

| | | | | |
|---|---|---|---|---|
| | | II. एकवाक्येन उत्तरत।<br>गृहिणी विहस्य मुनिं किम् अवदत्?<br>III. भाषिक-कार्यम्-<br>(i) 'निर्गत्य' पदस्य किं विलोमपदम्?<br>(अ) विस्मितः (ब) विहस्य<br>(स) एत्य (द) आकर्ण्य<br>(ii) 'अयाचत' इत्यस्याः क्रियायाः कर्तृपदं किम्?<br>(अ) एकदा (ब) क्वापि<br>(स) असौ (द) मुनिः | | |
| | 10 | **अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत :-(2+1+2)** भारतं वर्तते मे परं सम्बलं<br>भारतं नित्यमेव स्मरामि प्रियम्।<br>भारतेनास्ति मे जीवनं जीवनं<br>भारतायार्पितं मेऽखिलं चेष्टितम्<br>I. एकपदेन उत्तरत। (i) मम सम्बलं किं वर्तते ?<br>(ii) प्रियभारतं कदा स्मरामि ?<br>II. पूर्णवाक्येन उत्तरत। मया मम अखिलं चेष्टितम् कस्मै समर्पितम् ?<br>III. निर्देशानुसारम् उत्तरत- (i) समस्तम् पदस्य पर्याय पदम् किं पयुक्तम।<br>(अ) परम् (ब) जीवनम्<br>(स) अखिलम् (द) प्रियम्<br>(ii) 'भारतं नित्यमेव स्मरामि प्रियम् अत्र विशेषणपदं किम्?<br>(अ) भारतम् (ब) नित्यम<br>(स) प्रियम् (द) एव | 5 |
| | 11 | **अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत -(2+1+2)**<br>**प्रताप :** कुतस्तावद् विजयः ! स्वदेशमेव त्यक्तुं तत्परोऽहम् ।<br>**भट :** (अञ्जलिं बद्ध्वा) महाराज ! नैवं तावत्। स्वामिभाग्यानाम् अनुगन्तारः वयम्। वयं सर्वे त्वाम् अनुगमिष्यामः ।<br>**प्रताप :** एवं न वक्तव्यम्। कृतज्ञोऽस्मि भवताम् अहम्। वीरैः धीरैः बहु उपकृतं देशस्य। स्वदेशे एव तिष्ठद्भिः भवद्भिः देशस्य स्वतन्त्रतायै प्रयत्नः समाधेयः।<br>**सर्वे भटाः** देशरक्षायै बद्धपरिकरा वयं तु भवन्तमेव अनुसरिष्यामः ।<br>**प्रताप :** यथा रोचते भवद्भ्यः । प्रदेशोऽयम् अस्माभिः त्याज्य एव। | 5 |

**(निस्सरति प्रतापः, भटाः चापि तमनुचरन्ति, तमेवं स्वतन्त्रताप्राप्तिं प्रति निराशं दृष्ट्वा अटवीवासिनो भिल्लाः दुःखीयन्ति)**

I. एकपदेन उत्तरत।

(i) कस्य स्वतन्त्रतायै प्रयत्नः समाधेयः ?

(ii) प्रतापं के अनुचरन्ति ?

II. पूर्णवाक्येन उत्तरत।

सर्वे भटाः प्रतापं किम् कथयन्ति ?

III. भाषिककार्यम्।

(i) 'उपकृतम्' इत्यस्याः क्रियायाः कर्तृपदं किम् ?

(अ) वीरैः (ब) धीरैः (स) वीरैः धीरैः (द) बहु

(ii) 'कर्तव्यः' इत्यर्थे किं पदं प्रयुक्तम् अस्ति अत्र ?

(अ) अनुसरिष्यामः (ब) अनुगन्तारः (स) समाधेयः (द) त्याज्यः

12 **अधोलिखितश्लोकयोः अन्वययोः रिक्तस्थानानि पूरयत।( ½ x 10 =5)** 5

**( क )** स्नेहं ददाति यो मह्यं नित्यं तस्मै ददाम्यहम्।
ज्योतिः पदार्थज्ञानार्थं कोऽहं वदतु साम्प्रतम्।।

**अन्वयः** – (i)____मह्यम् नित्यम्(ii)____ददाति(iii)____तस्मै(iv) ____ज्योतिः ददामि। साम्प्रतंवदतु(v) ____कः अस्मि।

**( ख )** यानस्यांगम् हरेः शस्त्रम्, चिह्नं भारतभूपतेः।
चलन्तं वर्तुलाकारं, यो जानाति सः पण्डितः।।

**अन्वयः** – (i)____ अंगम् हरेः (ii)____ भारतभूपतेः (iii)____(iv) ____ चलन्तम् यः जानाति (v) ____ पण्डितः।

13 **रेखांकितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत।** 5

(i) जलबिन्दवः मधुरसंगीतं जनयन्ति स्म।

(ii) प्रतिध्वनिविज्ञानं विना संगीतसाधनानां निर्माणम् असाध्यम्।

(iii) विज्ञाने गभीराध्ययनं कृत्वा अस्माकं पूर्वजैः अभूतपूर्वाः सिद्धयः सम्प्राप्ताः।

(iv) वृक्षायुर्वेदः महर्षिपराशरेण विरचितः।

(v) बोधायनाचार्येण शुल्वसूत्रेषु पैथागोरसप्रमेयः पूर्वमेव निरूपितः।

14 **अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य लिखत।**(½ x 10 = 5) 5

(1) मात्रा अनुमतः अष्टावक्रः राजसभां गतः।

(2) अष्टावक्रः पण्डितानां चेष्टितं दृष्ट्वा उच्चैः अहसत्।

(3) हे राजन्! किम् वक्रे देहे आत्मा अपि वक्रः भवति?

(4) पण्डिताः तं वक्रदेहं बालं दृष्ट्वा हसितुम् प्रारभन्त।

(5) माता अष्टावक्रं पितुः विषये अवदत्।

(6) जनकः अपृच्छत् – भो अष्टावक्र! किमर्थम् हससि?

| | | | |
|---|---|---|---|
| | | (7) राजर्षिः जनकः तं स्वगुरुम् अमन्यत।<br>(8) अष्टावक्रस्य शास्त्रपांडित्येन सर्वे प्रभाविताः जाताः।<br>(9) जनकः स्वमनः अष्टावक्राय यच्छति।<br>(10) अष्टावक्रः अवदत् – ''एते मे देहं दृष्ट्वा हसन्ति, अहम् एतेषां मूर्खतां दृष्ट्वा हसामि।'' | |
| 15 | | **रेखाङ्कितशब्दानाम् अर्थान् विकल्पेभ्यः चित्वा लिखत।**<br>(i) कृष्ण–आनना <u>आलोच्य</u> वदन्तु काऽहम्।<br>(अ) आलोचना (ब) स्तुति (स) विचार्य<br>(ii) सूर्यैकपुत्रो वद् वेत्सि <u>चेत्</u> त्वम्।<br>(अ) यदि (ब) <u>चैत्रमास</u> (स) कोमलं<br>(iii) नृत्यामि नित्यं <u>धवल</u>ास्तरेषु।<br>(अ) निर्मल (ब) प्रदत्त (स) सरस्वती<br>(iv) चलन्तं <u>वर्तुलाकारं</u> योजानाति सः पंडितः।<br>(अ) वृत्ताकारं (ब) वक्राकारं (स) बकसदृशम्<br>(v) ज्योतिः पदार्थज्ञानार्थं <u>ददामि</u>।<br>(अ) यच्छामि (ब) प्रक्ष्यामि (स) द्रक्ष्यामि | 5 |
| | | | |
| | | -o0o0o0o- | |